श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ द्विनवतितमः सर्गः ॥


*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्विनवतितमः सर्गः ॥

## रावणस्य शोकः सुपार्श्वकर्तृकाश्वासनेन च तस्य सीतावधान्निवृत्तिः

ततः पौलस्त्यसचिवाः श्रुत्वा चेन्द्रजितो वधम्।
आचचक्षुरभिज्ञाय दशग्रीवाय सत्वराः ॥ **6.92.1** ॥

युद्धे हतो महाराज लक्ष्मणेन तवात्मजः।
विभीषणसहायेन मिषतां नो महाद्युतिः ॥ **6.92.2** ॥

शूरः शूरेण सङ्गम्य संयुगेष्वपराजितः।
लक्ष्मणेन हतः शूरः पुत्रस्ते विबुधेन्द्रजित् ॥ **6.92.3** ॥

गतः स परमान् लोकाञ्शरैः सन्तर्प्य लक्ष्मणम्।
स तं प्रतिभयं श्रुत्वा वधं पुत्रस्य दारुणम् ॥ **6.92.4** ॥

घोरमिन्द्रजितः सङ्ख्ये कश्मलं प्राविशन्महत्।
उपलभ्य चिरात् संज्ञां राजा राक्षसपुङ्गवः ॥ **6.92.5** ॥

पुत्रशोकाकुलो दीनो विललापाकुलेन्द्रियः।
हा राक्षसचमूमुख्य मम वत्स महाबल ॥ **6.92.6** ॥

जित्वेन्द्रं कथमद्य त्वं लक्ष्मणस्य वशं गतः।
ननु त्वमिषुभिः क्रुद्धो भिन्द्याः कालान्तकावपि ॥ **6.92.7** ॥

मन्दरस्यापि शृङ्गाणि किं पुनर्लक्ष्मणं युधि।
अद्य वैवस्वतो राजा भूयो बहुमतो मम॥ **6.92.8**॥

येनाद्य त्वं महाबाहो संयुक्तः कालधर्मणा।
एष पन्थाः सुयोधानां सर्वामरगणेष्वपि।
यः कृते हन्यते भर्तुः स पुमान् स्वर्गमृच्छति॥ **6.92.9**॥

अद्य देवगणाः सर्वे लोकपाला महर्षयः।
हतमिन्द्रजितं श्रुत्वा सुखं स्वप्स्यन्ति निर्भयाः॥ **6.92.10**॥

अद्य लोकास्त्रयः कृत्स्ना पृथिवी च सकानना।
एकेनेन्द्रजिता हीना शून्येव प्रतिभाति मे॥ **6.92.11**॥

अद्य नैर्ऋतकन्यानां श्रोष्याम्यन्तःपुरे रवम्।
करेणुसङ्घस्य यथा निनादं गिरिगह्वरे॥ **6.92.12**॥

यौवराज्यं च लङ्कां च रक्षांसि च परन्तप।
मातरं मां च भार्याश्च क्व गतोऽसि विहाय नः॥ **6.92.13**॥

मम नाम त्वया वीर गतस्य यमसादनम्।
प्रेतकार्याणि कार्याणि विपरीते हि वर्तसे॥ **6.92.14**॥

स त्वं जीवति सुग्रीवे लक्ष्मणे च सराघवे।
मम शल्यमनुद्धृत्य क्व गतोऽसि विहाय नः॥ **6.92.15**॥

एवमादिविलापार्तं रावणं राक्षसाधिपम्।
आविवेश महान् कोपः पुत्रव्यसनसम्भवः॥ **6.92.16**॥

प्रकृत्या कोपनं ह्येनं पुत्रस्य पुनराधयः।
दीप्तं सन्दीपयामासुर्घर्मेऽर्कमिव रश्मयः॥ **6.92.17**॥

ललाटे भ्रुकुटीभिश्च सङ्गताभिर्व्यरोचत।
युगान्ते सह नक्रैस्तु महोर्मिभिरिवोदधिः॥ **6.92.18** ॥

कोपाद् विजृम्भमाणस्य वक्त्राद् व्यक्तमिव ज्वलन्।
उत्पपात सधूमाग्निर्वृत्रस्य वदनादिव॥ **6.92.19** ॥

स पुत्रवधसन्तप्तः शूरः क्रोधवशं गतः।
समीक्ष्य रावणो बुद्ध्या वैदेह्या रोचयद् वधम्॥ **6.92.20** ॥

तस्य प्रकृत्या रक्ते च रक्ते क्रोधाग्निनापि च।
रावणस्य महाघोरे दीप्ते नेत्रे बभूवतुः॥ **6.92.21** ॥

घोरं प्रकृत्या रूपं तत् तस्य क्रोधाग्निमूर्च्छितम्।
बभूव रूपं क्रुद्धस्य रुद्रस्येव दुरासदम्॥ **6.92.22** ॥

तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नश्रुबिन्दवः।
दीपाभ्यामिव दीप्ताभ्यां सार्चिषः स्नेहबिन्दवः॥ **6.92.23** ॥

दन्तान् विदशतस्तस्य श्रूयते दशनस्वनः।
यन्त्रस्याकृष्यमाणस्य मथ्नतो दानवैरिव॥ **6.92.24** ॥

कालाग्निरिव सङ्क्रुद्धो यां यां दिशमवैक्षत।
तस्यां तस्यां भयत्रस्ता राक्षसाः संविलिल्यिरे॥ **6.92.25** ॥

तमन्तकमिव क्रुद्धं चराचरचिखादिषुम्।
वीक्षमाणं दिशः सर्वा राक्षसा नोपचक्रमुः॥ **6.92.26** ॥

ततः परमसङ्क्रुद्धो रावणो राक्षसाधिपः।
अब्रवीद् रक्षसां मध्ये संस्तम्भयिषुराहवे॥ **6.92.27** ॥

मया वर्षसहस्राणि चरित्वा परमं तपः।
तेषु तेष्ववकाशेषु स्वयम्भूः परितोषितः॥ **6.92.28** ॥

तस्यैव तपसो व्युष्ट्या प्रसादाच्च स्वयम्भुवः।
नासुरेभ्यो न देवेभ्यो भयं मम कदाचन॥ **6.92.29** ॥

कवचं ब्रह्मदत्तं मे यदादित्यसमप्रभम्।
देवासुरविमर्देषु न च्छिन्नं वज्रमुष्टिभिः॥ **6.92.30** ॥

तेन मामद्य संयुक्तं रथस्थमिह संयुगे।
प्रतीयात् कोऽद्य मामाजौ साक्षादपि पुरन्दरः॥ **6.92.31** ॥

यत् तदाभिप्रसन्नेन सशरं कार्मुकं महत्।
देवासुरविमर्देषु मम दत्तं स्वयम्भुवा॥ **6.92.32** ॥

अद्य तूर्यशतैर्भीमं धनुरुत्थाप्यतां मम।
रामलक्ष्मणयोरेव वधाय परमाहवे॥ **6.92.33** ॥

स पुत्रवधसन्तप्तः क्रूरः क्रोधवशं गतः।
समीक्ष्य रावणो बुद्ध्या सीतां हन्तुं व्यवस्यत॥ **6.92.34** ॥

प्रत्यवेक्ष्य तु ताम्राक्षः सुघोरो घोरदर्शनः।
दीनो दीनस्वरान् सर्वांस्तानुवाच निशाचरान्॥ **6.92.35** ॥

मायया मम वत्सेन वञ्चनार्थं वनौकसाम्।
किञ्चिदेव हतं तत्र सीतेयमिति दर्शितम्॥ **6.92.36** ॥

तदिदं तथ्यमेवाहं करिष्ये प्रियमात्मनः।
वैदेहीं नाशयिष्यामि क्षत्रबन्धुमनुव्रताम्॥ **6.92.37** ॥

इत्येवमुक्त्वा सचिवान् खड्गमाशु परामृशत्।
उद्धृत्य गुणसम्पन्नं विमलाम्बरवर्चसम्॥ **6.92.38** ॥

निष्पपात स वेगेन सभार्यः सचिवैर्वृतः।
रावणः पुत्रशोकेन भृशमाकुलचेतनः॥ 6.92.39 ॥

सङ्क्रुद्धः खड्गमादाय सहसा यत्र मैथिली।
व्रजन्तं राक्षसं प्रेक्ष्य सिंहनादं विचुक्रुशुः॥ 6.92.40 ॥

ऊचुश्चान्योन्यमालिङ्ग्य सङ्क्रुद्धं प्रेक्ष्य राक्षसम्।
अद्यैनं तावुभौ दृष्ट्वा भ्रातरौ प्रव्यथिष्यतः॥ 6.92.41 ॥

लोकपाला हि चत्वारः क्रुद्धेनानेन निर्जिताः।
बहवः शत्रवश्चान्ये संयुगेष्वभिपातिताः॥ 6.92.42 ॥

त्रिषु लोकेषु रत्नानि भुङ्क्ते आहृत्य रावणः।
विक्रमे च बले चैव नास्त्यस्य सदृशो भुवि॥ 6.92.43 ॥

तेषां सञ्जल्पमानानामशोकवनिकां गताम्।
अभिदुद्राव वैदेहीं रावणः क्रोधमूर्च्छितः॥ 6.92.44 ॥

वार्यमाणः सुसङ्क्रुद्धः सुहृद्भिर्हितबुद्धिभिः।
अभ्यधावत सङ्क्रुद्धः खे ग्रहो रोहिणीमिव॥ 6.92.45 ॥

मैथिली रक्ष्यमाणा तु राक्षसीभिरनिन्दिता।
ददर्श राक्षसं क्रुद्धं निस्त्रिंशवरधारिणम्॥ 6.92.46 ॥

तं निशम्य सनिस्त्रिंशं व्यथिता जनकात्मजा।
निवार्यमाणं बहुशः सुहृद्भिरनिवर्तिनम्॥ 6.92.47 ॥

सीता दुःखसमाविष्टा विलपन्तीदमब्रवीत्।
यथायं मामभिक्रुद्धः समभिद्रवति स्वयम्॥ 6.92.48 ॥

वधिष्यति सनाथां मामनाथामिव दुर्मतिः।
बहुशश्चोदयामास भर्तारं मामनुव्रताम् ॥ **6.92.49** ॥

भार्या मम भवस्वेति प्रत्याख्यातो ध्रुवं मया।
सोऽयं मामनुपस्थाने व्यक्तं नैराश्यमागतः ॥ **6.92.50** ॥

क्रोधमोहसमाविष्टो व्यक्तं मां हन्तुमुद्यतः।
अथवा तौ नरव्याघ्रौ भ्रातरौ रामलक्ष्मणौ ॥ **6.92.51** ॥

मन्निमित्तमनार्येण समरेऽद्य निपातितौ।
भैरवो हि महान् नादो राक्षसानां श्रुतो मया ॥ **6.92.52** ॥

बहूनामिह हृष्टानां तथा विक्रोशतां प्रियम्।
अहो धिङ्मन्निमित्तोऽयं विनाशो राजपुत्रयोः ॥ **6.92.53** ॥

अथवा पुत्रशोकेन अहत्वा रामलक्ष्मणौ।
विधमिष्यति मां रौद्रो राक्षसः पापनिश्चयः ॥ **6.92.54** ॥

हनूमतस्तु तद् वाक्यं न कृतं क्षुद्रया मया।
यद्यहं तस्य पृष्ठेन तदायासमनिर्जिता ॥ **6.92.55** ॥

नाद्यैवमनुशोचेयं भर्तुरङ्कगता सती।
मन्ये तु हृदयं तस्याः कौसल्यायाः फलिष्यति ॥ **6.92.56** ॥

एकपुत्रा यदा पुत्रं विनष्टं श्रोष्यते युधि।
सा हि जन्म च बाल्यं च यौवनं च महात्मनः ॥ **6.92.57** ॥

धर्मकार्याणि रूपं च रुदती संस्मरिष्यति।
निराशा निहते पुत्रे दत्त्वा श्राद्धमचेतना ॥ **6.92.58** ॥

अग्निमावेक्ष्यते नूनमपो वापि प्रवेक्ष्यति।
धिगस्तु कुब्जामसतीं मन्थरां पापनिश्चयाम् ॥ **6.92.59** ॥

यन्निमित्तमिमं शोकं कौसल्या प्रतिपत्स्यते।
इत्येवं मैथिलीं दृष्ट्वा विलपन्तीं तपस्विनीम्॥ **6.92.60** ॥

रोहिणीमिव चन्द्रेण विना ग्रहवशं गताम्।
एतस्मिन्नन्तरे तस्य अमात्यः शीलवाञ्छुचिः॥ **6.92.61** ॥

सुपार्श्वो नाम मेधावी रावणं रक्षसां वरम्।
निवार्यमाणः सचिवैरिदं वचनमब्रवीत्॥ **6.92.62** ॥

कथं नाम दशग्रीव साक्षाद्वैश्रवणानुज।
हन्तुमिच्छसि वैदेहीं क्रोधाद् धर्ममपास्य च॥ **6.92.63** ॥

वेदविद्याव्रतस्नातः स्वकर्मनिरतस्तथा।
स्त्रियः कस्माद् वधं वीर मन्यसे राक्षसेश्वर॥ **6.92.64** ॥

मैथिलीं रूपसम्पन्नां प्रत्यवेक्षस्व पार्थिव।
तस्मिन्नेव सहास्माभिराहवे क्रोधमुत्सृज॥ **6.92.65** ॥

अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशी।
कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः॥ **6.92.66** ॥

शूरो धीमान् रथी खड्गी रथप्रवरमास्थितः।
हत्वा दाशरथिं रामं भवान् प्राप्स्यति मैथिलीम्॥ **6.92.67** ॥

स तद् दुरात्मा सुहृदा निवेदितं
    वचः सुधर्म्यं प्रतिगृह्य रावणः।
गृहं जगामाथ ततश्च वीर्यवान्
    पुनः सभां च प्रययौ सुहृद्वृतः॥ **6.92.68** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विनवतितमः सर्गः॥